# स्वरमङ्गला

## त्रैमासिकी संस्कृत-शोध-पत्रिका

वर्षः - 41 जनवरी-मार्च 2016 अङ्कः - 1

राजस्थान संस्कृत अकादमी

जे-15, अकादमी संकुल (द्वितीय तल),
झालाना सांस्थानिक क्षेत्र, झालाना डूंगरी, जयपुर-302004
दूरभाष एवं फैक्स - 2709120
E-mail: rajasthansanskritacademy@gmail.com
Website: www.rajasthansanskritacademy.org

वर्ष : 41 अङ्कः 1
जनवरी-मार्च, 2016

स्वरमङ्गला
ISSN-2249-9296

# 'ज्ञाननिवर्त्यत्वं मिथ्यात्वम्' इति मिथ्यात्वलक्षणविमर्शः

– डॉ. जानकीशरणदासः

**शोधसारः**

[अद्वैतवेदान्तशास्त्रे जगन्मिथ्यात्वप्रतिपादनपुरस्सरं ब्रह्मणः सत्यत्वं प्रतिपाद्यते। सर्वबन्धविवर्तब्रह्मस्वरूपत्वात् कर्तृत्वादिस्वभावतः अन्तःकरणाध्यासादेव जीवस्य कर्तृत्वादिप्रतीतिरिति वेदान्तसिद्धान्तः। अन्तःकरणादिसर्वोऽपि अनात्मप्रपञ्चः आत्मन्यारोपितः, अत एव मिथ्येति 'नेह नानास्ति किञ्चन' इत्यादिश्रुतिभिर्निर्णीतः। वस्तुतः प्रतिदिनं परिदृश्यमानस्य प्रपञ्चस्य मिथ्यात्वप्रतिपादनमतिदुस्साध्यमेव तथापि अद्वैतवेदान्तशास्त्रे दुःसाध्यं प्रपञ्चमिथ्यात्वं साध्यं भवति। अत्रैव वर्तते शास्त्रस्य सिद्धान्तः तात्पर्यञ्च। निर्धर्मकब्रह्मणः अद्वितीयत्वं प्रपञ्चमिथ्यात्वेनैव सिध्यति। अयमेवार्थः श्रीमधुसूदनसरस्वतीकृतायाम् अद्वैतसिद्धौ दृश्यत्वादिलिङ्गेनानुमानेन प्रदर्शितः। तत्र द्वैतमिथ्यात्वसाधनाय प्रवृत्तेनाचार्येण 'विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात्, शुक्तिरूप्यवत्' इत्यनुमानं प्रादर्शि। तत्र किमिदं मिथ्यात्वं साध्यते अर्थात् मिथ्यात्वस्य लक्षणं किमिति शङ्कायाम् अद्वैतसिद्धिकारः पद्मपादाचार्यसम्मतं 'सदसदनधिकरणत्वं मिथ्यात्वम्', विवरणाचार्यसम्मतञ्च 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमि'ति लक्षणद्वयमुपपादितम्। तदनन्तरम् 'विद्वान्नामरूपाद्विमुक्तः', 'तरति शोकमात्मवित्' इत्यादिश्रुत्यनुसारं पुनः विवरणाचार्यसम्मतं 'ज्ञाननिवर्त्यत्वं मिथ्यात्वम्' इति तृतीयं मिथ्यात्वलक्षणमुक्तम्। एतत्तृतीयलक्षणानुसारं ज्ञानेन कथं बन्धो निवर्त्यते, 'निवृत्ति' इति पदेन किमभिहितम् इति निरूपणस्य प्रयासः अस्मिन् शोधपत्रे विहितोऽस्ति।]

श्रुतिषु जीवस्य बन्धनिरूपणावसरे अयं बन्धो मिथ्येति बहुत्र प्रतिपादितम्। तद्यथा 'तरति शोकमात्मवित्',[1] 'विद्वान्नामरूपाद्विमुक्तः',[2] 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य

1. छान्दोग्योपनिषत्, 7-1-3
2. मुण्डकोपनिषत्, 3-2-8



कर्माणि तस्मिन् दृष्टे परावरे',[3] 'अतोऽन्यदार्तम्'[4] इति। एताभिः श्रुतिभिः ज्ञाननिवर्त्यत्वायथानुपपत्त्या बन्धस्य मिथ्यात्वमुच्यते। अर्थात् अस्य बन्धस्य मिथ्यात्वं ज्ञाननिवर्त्यान्यथानुपपत्त्यापि सिद्ध्यति। एताः एव श्रुतयः मनसि निधाय अद्वैतसिद्धिकाराः मधुसूदनसरस्वतीमहाभागाः विवरणाचार्यसम्मतं लक्षणान्तरं 'ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्'[5] इति लक्षणमूचुः। अत्र निवृत्तिपदस्य 'नाशः' इत्यर्थः। तथा च ज्ञाननाश्यत्वं ज्ञाननिवर्त्यत्वम् । शुक्तिरजतस्थले समन्वयं पश्यामः। 'इदं रजतम्' इति रजतभ्रमानन्तरं 'नेदं रजतम्' इति बाधोऽनुभूयते । नेदं रजतमिति ज्ञाननिवर्त्यत्वं रजते वर्तते, मिथ्यात्वमपि। एवम् 'अयं प्रपञ्चः' इत्यनुभवः अधिष्ठानब्रह्मसाक्षात्कारे सति 'नेति नेति' इति बाधकज्ञानेन अर्थात् ब्रह्मज्ञानेन बाध्यते । एवञ्च ज्ञाननिवर्त्यत्वं प्रपञ्चे अस्ति, मिथ्यात्वमपि वर्तते इति कृत्वा लक्षणसमन्वयः अत्र सम्भवति ।

यद्यपि निवर्त्यत्वमात्रं मिथ्यात्वं साधयति। यतः मिथ्यात्वमनित्यत्वव्यापकम्, निवर्त्यमात्रमनित्यम्। अतः निवर्त्यत्वमात्रं वक्तुमुचितं तथापि श्रुत्यर्थानुगमाय स्फुटप्रतिपत्त्यर्थञ्च निवर्त्यत्वमिति अनुक्त्वा 'ज्ञाननिवर्त्यत्वम्' इत्युच्यते। 'तरति शोकमात्मवित्'[6] इत्यस्यां श्रुतौ 'तरति' इति पदेन 'सेतुं तरति' इत्यादिरूपेण तरणमात्रं नोच्यते किन्तु 'तरति ब्रह्महत्याम्+ इत्यादिवत् निवृत्तिः अत्राभिप्रेता। 'तरति शोकमात्मवित्' इत्यत्र शोकपदं बन्धमात्रमुपलक्षणार्थम्। एवञ्च आत्मज्ञानेन शोकादुपलक्षितः बन्धो निवर्त्यते इति अस्याः श्रुतेरर्थः। 'विद्वान्नामरूपाद्विमुक्तः'[7] इत्यत्र नामरूपपदं कृत्स्नानात्मप्रपञ्चपरं, तस्य नामरूपात्मकानात्मप्रपञ्चस्य मिथ्यासमकालीनं निवर्तनं श्रुतम्। एवञ्च एताः श्रुतयः अविद्याकल्पितानात्मप्रपञ्चस्य मिथ्यात्वं ज्ञापयन्ति। अपि च ज्ञानस्य अज्ञानेन सह विरोधः प्रसिद्धः इति कृत्वा ज्ञानेन अज्ञानं निवर्तते इति श्रुतेराशयः। अज्ञाननिवृत्तेः तत्प्रयुक्तसर्वोऽपि बन्धः निवर्तते। अतः ज्ञानेन निवर्त्यमानस्य बन्धस्य मिथ्यात्वम् अन्यथानुपपत्त्या कल्प्यते।

अत्र मिथ्यात्वमेव निवर्तकावच्छेदकम् अर्थात् अधिष्ठानप्रमाजनितनिवर्तकतावच्छेदकम्। तद्यथा शुक्तिरूप्याध्यासः 'नेदं रजतं किन्तु शुक्तिः' इति ज्ञानेन, रज्जुसर्पाध्यासः 'नायं सर्पः किन्तु रज्जुः' इति ज्ञानेन निवर्तते। अत्र निवर्तकतावच्छेदकं शुक्तिरजतत्वं रज्जुसर्पत्वम् इत्यादि भवितुं नार्हति, अननुगमात्। यतः ज्ञाननिवर्त्यत्वं सर्वेष्वनुगतम्, अतः तदवच्छेदकमपि तदनुगतमेव भवेत्। तस्मात् **मिथ्यात्वमेव** तत्र निवर्तकतावच्छेदकम्।

अत्र पूर्वपक्षी शङ्कते–ज्ञाननिवर्त्यत्वं मिथ्यात्वमिति लक्षणं दोषग्रस्तम्। ज्ञानस्य नाशकत्वमात्रेण नाश्यस्य मिथ्यात्वेऽतिप्रसङ्गात्। तद्यथा योग्यविभुविशेषगुणानां

3. मुण्डकोपनिषत्, 2-2-8
4. बृहदारण्यकोपनिषत्, 3-4-2
5. अद्वैतसिद्धिः, पृ. 160
6. छान्दोग्योपनिषत्, 7-1-3
7. मुण्डकोपनिषत्, 3.2.8
8. बृहदारण्यकोपनिषत्, 3.4.2

स्वोत्तरवर्तिगुणनाश्यत्वमिति तार्किकाणां समयः। तथा च आत्मनि मनःसंयोगेन समवायसम्बन्धेन ज्ञानं उत्पद्यते। तच्च क्षणत्रयं स्थित्वा उत्तरज्ञानेन नश्यति। सति चैवं पूर्वज्ञानस्य उत्तरज्ञाननिवर्त्यत्वं वर्तते किन्तु तस्य मिथ्यात्वव्यवहारो नास्तीति अतिव्याप्तिः। अपि च अद्वैतसिद्धान्ते 'अतोऽन्यदार्तम्'[8] इति श्रुत्यनुरोधेन ब्रह्मभिन्नं सर्वं मिथ्या। अतः ज्ञानेन यन्निवर्तते तन्मिथ्या इति उक्ते सति मुद्गरपातेन निवर्त्ये घटे ज्ञाननिवर्त्यत्वं नास्तीति तत्र अव्याप्तिः। ज्ञानत्वेन ज्ञाननिवर्त्यत्वं[9] मिथ्यात्वमिति लक्षणपरिष्कारेऽपि अतिव्याप्तिः तथैव तिष्ठति।

अधिष्ठानसाक्षात्कारत्वेन निवर्त्ये शुक्तिरजतादौ ज्ञाननिवर्त्यत्वं नास्तीति अव्याप्तिः, साध्यवैकल्यञ्च। एतद्दोषपरिजिहीर्षया ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वं विवक्षितं चेत् स्मृतौ जातायां संस्कारो नश्यति, संस्कारमात्रजन्यं ज्ञानं स्मृतिः। स्मृतौ ज्ञानत्वव्याप्यधर्मो नास्ति, एवञ्च ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वे स्मृतित्वेन निवर्त्ये संस्कारे ज्ञानत्वं ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वमस्ति, मिथ्यात्वं नास्ति इति अतिव्याप्तिः।

अत्रोच्यते समाधानम्–ज्ञाननिवर्त्यत्वं नाम ज्ञानप्रयुक्तावस्थितिविरहसामान्यप्रतियोगित्वम्। अत्र **ज्ञान**पदमधिष्ठानतत्त्वपरं, **प्रयुक्त**पदं व्यापकपरमवस्थितिसामान्यञ्च स्वस्वीयसंस्कारान्यतररूपम्, निवृत्तिपदम् अत्यन्ताभावमाचष्टे। तथा च अधिष्ठानतत्त्वज्ञानव्यापकाज्ञानादेः अवस्थितिसामान्यः अत्यन्ताभावः तत्प्रतियोगित्वं मिथ्यात्वम्। ज्ञाननिवर्त्यत्वं नाम ज्ञाननिष्ठकारणतानिरूपितकार्यतानाशप्रतियोगित्वं वेदान्तिभिर्नाङ्गीक्रियते। एवञ्च अधिष्ठानतत्त्वज्ञाप्यः योऽवस्थितिसामान्यात्यन्ताभावः तत्प्रतियोगित्वमेव ज्ञाननिवर्त्यत्वमिति लक्षणं फलितम्।[10] तथा च **विवरणग्रन्थे** अज्ञानकार्यस्य या प्रविलीनरूपता उक्ता, सा एव अत्र कारणात्मशब्देन, या च तत्र वर्तमानरूपता उक्ता सा स्वरूपशब्देन उक्ताऽस्ति। सिद्धान्ते कार्यमात्रस्य अधिष्ठानतत्त्वसाक्षात्कारपर्यन्तं कार्याभिन्नं किञ्चिद्रूपमवश्यं तिष्ठीति अङ्गीकारात् कार्यस्य स्वरूपेण निवृत्तावपि संस्काररूपेणावस्थानात्। मुद्गरपातानन्तरं घटस्य स्वरूपेणावस्थितिविरहेऽपि कारणात्मना अवस्थानात्। अभिव्यक्तानभिव्यक्तावस्थयोः तादात्म्याभ्युपगमादेव अत्र सत्कार्यवादाभ्युपगम उक्तः। प्रलये कार्याणामभिव्यक्तरूपतायाः निवृत्तावपि अनभिव्यक्तरूपेणावस्थानं श्रुतिसिद्धम्। 'तद्धेदं तर्ह्यव्याकृतमासीत्'[12] इत्यादिश्रुतौ अव्याकृतपदार्थस्य इदं पदार्थाभेदेन निर्देशोऽस्ति।

9. ज्ञानत्वेन ज्ञाननिवर्त्यत्वं नाम ज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावन्नाशप्रतियोगित्वेत्यर्थः।
10. ज्ञाननिवर्त्यत्वं नाम 'तत्त्वज्ञाननिवर्त्यत्वं मिथ्यात्वं जगतोऽस्तु वा । ज्ञानप्रयुक्तावस्थानसामान्यविरहस्य यत्॥' - अद्वैतसिद्धिसिद्धान्तसारः, पृ. 7, श्लोक. 15
11. 'अवस्थितिश्च द्वेधा, स्वरूपेण कारणात्मना च सत्कार्यवादाभ्युपगमात्। - अद्वैतसिद्धिः, पृ. 130
12. बृहदारण्यकोपनिषत्, 4-1-7





अत्र पुनः एवं शङ्का जायते– मिथ्यात्वं नाम अज्ञानप्रयुक्तत्वम्। अज्ञानाचरितस्याज्ञानकल्पितत्वेऽपि अज्ञानस्याज्ञानकल्पितत्वं नास्ति, किन्तु तस्यापि ज्ञानपरकत्वमेवास्ति। अतः यज्ज्ञाननिवर्त्यं, तदज्ञानकल्पितमिति व्याप्तिर्नास्ति। अस्य समाधाने **सङ्क्षेपशारीरक**काराः एवं वदन्ति–

**भेदं च भेद्यं च भिनत्ति भेदो यथैव भेदान्तरमन्तरेण।**
**मोहं च कार्यं च बिभर्ति मोहस्तथैव मोहान्तरमन्तरेण॥[13] इति।**

अर्थात् भेदः घटपटद्वयं भेद्यं परस्परं भिन्नतया बोधयति तथैव स्वात्मानमपि तस्मात् भेद्यात् घटपटात् भिन्नतया बोधयति, न तु तस्य भेदप्रतियोगिकं भेदान्तरमपेक्ष्यते, अनवस्थापातात्। एवमेव अज्ञानमपि स्वं परञ्च निर्वहति तथैव अद्वैतमनात्मप्रपञ्चमपि सर्वं कल्पितमिति तत्र अविद्याप्रयुक्तत्वापरपर्यायं मिथ्यात्वं वर्तते इति, तदेव निवर्तकतावच्छेदकम्। एवं ज्ञानस्यापि निवर्तकत्वे, तत्तद्विषयकत्वम् अर्थात् रजताध्यासस्थले रजतं निवर्तते, तत्र ज्ञानस्य शुक्तिविषयकत्वं एवं रज्जुसर्पाध्यासस्थले रज्जुविषयकत्वमित्येव निवर्तकतावच्छेदकं भवितुं नार्हति, अननुगमात्। अतः तत्र अधिष्ठानतत्त्वमेव निवर्तकतावच्छेदकम्। एवं सति नियमोऽयं सम्पद्यते–यत्र ज्ञानस्य अधिष्ठानप्रमात्वेन निवर्तकत्वम्, तत्र मिथ्यात्वेनैव निवर्त्यत्वम् इति। यदि नियमोऽयं नाङ्गीक्रियते तर्हि अनन्तकल्पनागौरवं भवति। तद्यथा यस्मै यन्निष्ठयदाकारा च अन्तःकरणवृत्तिः प्रमातरि च उदेति, तन्निष्ठाज्ञानं नाशयतीति प्रसिद्धम्। यथा देवदत्तनिष्ठघटाद्याकारप्रमा देवदत्तनिष्ठघटाद्याकारमज्ञानं नाशयति। उपादाननाशश्च उपादेयनाशकः इत्यपि प्रसिद्धम्। अतः शुक्त्यादिज्ञानेन शुक्त्याद्यज्ञानं निवर्तते, तन्निवृत्तौ तत्प्रयुक्तः रजताद्यध्यासोऽपि निवर्तते इति सिद्धं भवति। अज्ञानस्याध्यासोपादानकत्वे अन्वयव्यतिरेक एव प्रमाणम्। यथोक्तं विवरणे–'ननु कथमज्ञानमध्यासस्योपादानम्? तस्मिन् सति अध्यासस्य उदयः, असति च अनुदयः इति ब्रूमः'[14] इति। एवमज्ञानस्याध्यासोपादानत्वे सिद्धे यत् श्रुतौ आत्मज्ञानेन प्रपञ्चनिवृत्तिः श्रूयते तत्रापि तत्तत् विषयकत्वं ज्ञानस्य निवर्तकतावच्छेदकं भवितुं नार्हति, गौरवात् अननुगमाच्च। एवञ्च येन रूपेण रजताद्यध्यासस्थले शुक्तिज्ञानं रजतं निवर्तयति, तेन रूपेणात्मज्ञानं प्रपञ्चं निवर्तयति। येन रूपेण रजतादिकं निवर्तते, तेन रूपेण निवर्तमानस्य प्रपञ्चस्य एवं रजतादेश्च निवर्त्यान्यथानुपपत्त्या मिथ्यात्वं कल्प्यते।

अत्रैवमाशङ्का–यज्ज्ञाननिवर्त्यं तन्मिथ्या इति नाङ्गीक्रियते। यतः ज्ञाननिवर्त्यं नाम केषाञ्चन मिथ्यात्वाभावः। तत्र सेतुं दृष्ट्वा ब्रह्महत्यां तरति इति शास्त्रवचनम्। तत्र सेतुदर्शनेन दुरितानि निवर्तन्ते

13. सङ्क्षेपशारीरकम्, 1.55
14. पञ्चपादिकाविवरणम्, पृ. 33

इति तस्याः श्रुतेराशयः। तत्र ज्ञाननिवर्त्यत्वमस्ति, किन्तु मिथ्यात्वं नास्ति अतः अव्याप्तिदोषः। तत्र मध्ये पुनः सिद्धान्ती शङ्कते–सेतुदर्शननिवर्त्येषु अधिष्ठानप्रमात्वेन निवर्तकत्वं नास्ति, अतः तत्र व्यापकाभावः सङ्गच्छते। तन्निराकरोति पूर्ववादी–एवमात्मज्ञानेन यः प्रपञ्चः निवर्तते तत्रापि अधिष्ठानत्वप्रमां विहाय रूपान्तरेण निवृत्तिरुच्यताम्, यतः ज्ञानं विविधैः रूपैः निवर्तयति। यथा स्वप्रागभावं प्रतियोगित्वेन रूपेण निवर्तयति, एवमुत्तरज्ञानं पूर्वज्ञानमुदीच्यात्मविशेषगुणत्वेन निवर्तयति। योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाशकत्वनियमात् उत्तरज्ञानं पूर्वज्ञानमुदीच्यात्मविशेषगुणत्वेन रूपेण निवर्तयति। स्मृतिः संस्कारं फलत्वेन रूपेण निवर्तयति। एवं विषयदोषदर्शनेन रागादयः निवर्तन्ते, तत्र विषयदोषदर्शनत्वेन रूपेण विषयदोषदर्शनं रागादीनां निवर्तकत्वम्। तथैव सेतुदर्शनं विहितक्रियात्वेन रूपेण दुरितनिवर्तकम्, अन्यथा म्लेच्छादीनामपि सेतुदर्शनेन दुरितनिवृत्तिः स्यात्। अपि च आस्तिकान्धजनस्यापि सेतुसमीपे समुद्रस्नातस्य सेतुदर्शनाभावेन पापनाशानुपपत्तिः स्यात्। एवं एतादृशस्थलेषु अधिष्ठानप्रमात्वं विहाय रूपादिनैव निवृत्तिरुच्यताम्। तत्र विहितत्वमिति यत् सेतुदर्शनविषये उक्तं, तथैवात्रापि भवितुमर्हति। अपि च 'आत्मा वा अरे द्रष्टव्यः'[15] अनया श्रुत्या आत्मदर्शनं विधीयते। अतः आत्मदर्शनं विहितत्वेन रूपेण प्रपञ्चं निवर्तयतीति पूर्वपक्षिण आशयः।

अत्रैवं समाधानं–आत्मज्ञानमपि अधिष्ठानप्रमात्वेन रूपेणैव प्रपञ्चं निवर्तयति, प्रकारान्तरस्य अभावात्। तद्यथा–न तावत् आत्मज्ञानं प्रतियोगित्वेन रूपेण प्रपञ्चं निवर्तयति। यतः प्रपञ्चो भावरूपः, तस्मात् आत्मज्ञानं प्रतियोगित्वेन रूपेण न निवर्तयति, नापि उत्तरज्ञानं पूर्वज्ञानमुदीच्यविशेषगुणत्वेन निवर्तयति, तथापि अत्र निवृत्तिः नास्ति। यतः आत्मविशेषगुणो नाम अर्थात् प्रपञ्चः आत्मविशेषगुणो न भवति। किञ्च स्मृत्यात्मकज्ञानेन यः संस्कारः निवर्तते, तत्रापि संस्कारस्य कार्यं भवति स्मृतिः, तस्मात् स्मृत्याः संस्कारो निवर्त्यताम्, इह तु निवर्त्यत्वेन रूपेण अभिप्रेतः आकाशः न आत्मज्ञानस्य कार्यम्। तस्मात् परत्वेन रूपेणापि न निवर्तते। इदञ्च सर्वमभिप्रेत्योक्तमद्वैतसिद्धौ–'स्मृतौ हि जातायां संस्कारो दृढो भवतीत्यनुभवसिद्धम्, तेषां दृढतरत्वञ्च समानविषयकसंस्कारानेकत्वम्'[16] इति। यच्च विषयदोषदर्शनेन रागादिनिवृत्तिरुक्ता तत्रापि बलवदनिष्टाननुबन्धीष्टसाधनत्वभ्रमः एव रागादिहेतुः, विषयदोषदर्शनञ्च अस्य भ्रमस्य निवृत्तिद्वारा रागादिकं निवर्तयति।

तस्मात् केनापि अन्येन प्रकारेण निवृत्तेरसम्भवात् यथा शुक्तिज्ञानमधिष्ठानप्रमात्वेन रजतादिकं निवर्तयति तथैवात्रापि इति वक्तव्यम्। तत्र बन्धनिवृत्तौ बन्धस्य अज्ञानकल्पितत्वात् ज्ञानातिरिक्तः

15. बृहदारण्यकोपनिषत्, 2-4-5

16. अद्वैतसिद्धिः, पृ. 177





कश्चिदुपायो नापेक्ष्यते। तत्र 'मायां तु प्रकृतिं विद्धि'[17] इति श्रुतिः, 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'[18] इति स्मृतिः प्रमाणम्। एवं श्रुतिस्मृतयः बन्धस्य अविद्याप्रयुक्तत्वं ज्ञापयति। अतः तत्र ज्ञानमेव उपायः, ज्ञानञ्चाज्ञाननिवृत्तौ स्वोत्पत्तिमन्तरेणान्यत् न किमपि अपेक्षते। तथा शुक्तिरजताद्यध्यासस्थले दृष्टम्। वार्तिककारैरपि तत्रोक्तम्–

**तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।**
**अविद्या सहकार्येण नाऽऽसीदस्ति भविष्यति॥[19] इति।**

अखण्डार्थकतत्त्वमस्यादिवेदान्तमहावाक्यजन्या या प्रमारूप चरममनोवृत्तिविशेषाः, तस्याः उत्पत्तिमात्रेण अविद्या नासीदस्ति भविष्यति। अत्र अज्ञाननिवर्तकज्ञानस्य स्वोत्पत्तिमन्तरेणाज्ञाननिवृत्तावन्यापेक्षा नास्तीति सूचयितुं मात्रपदमुपात्तम्। कार्येण सहिताया अविद्याया अतीतकालीना वर्तमाना भाविनी च या सत्ता तदत्यन्ताभावस्तादृशतत्त्वज्ञानप्रयोज्य इति वार्तिकवाक्यार्थः। अत्र श्रुतिरपि 'यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति'[20] इति अविद्यावस्थायां संसारावस्थामुक्त्वा, यत्र तु विद्यावस्थायां 'तत् केन कं पश्येत'[21] इति ज्ञानावस्थायां संसाराभावं दर्शयति। एवञ्च बन्धनिवर्त्यर्थं ज्ञानातिरिक्तः उपायः भवितुं नार्हति। तस्मात् केवलं ज्ञानं बन्धं निवर्तयति, तत्र अधिष्ठानप्रमात्वेन निवर्तकतावच्छेदकमिति सिद्धम्।

तत्र पुनः एवमाशङ्कितम्–ज्ञाननिवर्त्यत्वमात्रेण मिथ्यात्वं न सिद्ध्यति। यतः ईश्वरज्ञानं सर्वस्यापि कार्यस्य कारणम्, अतः घटनाशं प्रत्यपि ईश्वरज्ञानं कारणम्। किन्तु ईश्वरज्ञाननिवर्त्ये घटादौ मिथ्यात्वं नास्ति। यतो हि सिद्धान्तिना अनात्मा सर्वोऽपि प्रपञ्चः मिथ्येति अभिप्रेतः तथापि ईश्वरज्ञाननिवर्त्येन रूपेण घटादीनां मिथ्यात्वं नास्ति। एवञ्च ईश्वरज्ञाननिवर्त्ये घटादौ मिथ्यात्वाभावात् मिथ्यात्वं नास्ति। तत्र एवं समाधीयते–सर्वज्ञः सर्वोपादानगोचरापरोक्षज्ञानम् ईश्वरस्य विद्यते। एवञ्च उपादानं तत्र अपेक्षितम्। अभावस्य, प्रकृते घटनाशस्य घटनाशरूपाभावस्य अभावत्वादेव तत्र उपादानगोचरज्ञानमेव न सम्भवतीति। अत्र पुनः शङ्का–श्रुतिप्रामाण्यात् सत्यः एव बन्धः निवतर्ताम्, तत्र मिथ्यात्वं मा भूत्। अत्रोच्यते सिद्धान्तिना–यदि बन्धः सत्यः तर्हि तस्य बन्धस्य निवृत्तिरेव निरूपयितुं न शक्यते। यतः यदि आत्मज्ञानं सत्यं बन्धं निवर्तयति तदा किं विषये निवृत्यात्मकं विषयं जनयति उत स्वाश्रये इति। अत्र विवरणप्रमेयसङ्ग्रहकाराः एव वदन्ति–'किमयं बन्धः पारमार्थिकः स्यादपारमार्थिको वेति। आद्ये ब्रह्मज्ञानात्र निवर्तेत। ये त्वेकदेश्यादयः पारमार्थिकस्यैव ज्ञानान्निवृत्तिमङ्गीकुर्युस्ते प्रष्टव्याः–ज्ञानं स्वविषये वा निवृत्त्याख्यमतिशयं जनयति

17. श्वेताश्वतरोपनिषत्, 4-10

18. भगवद्गीता, 5-15

19. बृहदारण्यकोपनिषद्भाष्यवार्तिकम्, 184

20. बृहदारण्यकोपनिषत्, 2-4-14

21. बृहदारण्यकोपनिषत्, 2-4-14

स्वाश्रये वा? आद्येऽपि स्वविषयं संसारिणमात्मानमेव निवर्तयेद्, उत तद्गतं धर्ममात्रम्, अथवा स्वबोध्याखण्डैकरसत्वविरोधिन एव कर्तृत्वादीन्, किं वा विषयगतानवबोधमेव? न तावत् प्रथमद्वितीयतृतीयाः, नहि नानावर्णे चूतादिफले नीलभागज्ञानं स्वविषयं वा तत्समवेतरसादिकं वा विरोधिनं पीतिमादिगुणं वा निवर्तयति। चतुर्थे त्वस्मन्मतापत्तिः। आश्रयातिशयपक्षेऽपि किमाश्रयनिवृत्तिः, किं वा तद्गुणानाम् उताश्रयविषयोभयसम्बन्धिधर्माणाम्? नाऽऽद्यः, प्रतिक्षणमात्मविनाशापत्तेः। न द्वितीयः, घटज्ञानेनाऽऽत्मगतधर्मादिगुणानिवृत्तेः। न तृतीयः, स्वदेहज्ञानेन देहात्मसम्बन्धाद्यनिवृत्तेः। 'तमेव विदित्वाऽतिमृत्युमेति'[22] इति श्रुतत्वाद् वास्तवोऽपि बन्धो ज्ञाननिवर्त्य इति चेद्, न; श्रुतेर्बन्धसत्यत्वासत्यत्वयोस्ताटस्थ्यात्। अस्माभिस्तु श्रुतोपपत्त्यर्थं बन्धस्याऽविद्यात्मत्वं कल्प्यते। यथा ज्योतिष्टोमादीनां श्रुतस्य स्वर्गसाधनत्वस्योपपत्त्यर्थमपूर्वं भवद्भिः कल्प्यते तद्वत्। अथ तत्र क्षणिकानां कर्मणां कालान्तरभाविफलसाधनत्वाभावव्याप्तिनियमः कल्पकोऽस्ति, तर्हीहाऽपि 'ज्ञानमज्ञानस्यैव निवर्तकम्' इति व्याप्तिनियमः कल्पकोऽस्तु। अतोऽपारमार्थिकत्वमवशिष्यते बन्धस्य।'[23] अतः प्रकृते ज्ञानेन निवर्त्त्यमानस्य बन्धस्य मिथ्यात्वं विना अनुपपद्यमानत्वात् श्रुतार्थापत्त्या बन्धस्य मिथ्यात्वं कल्प्यते, तस्माद् मिथ्याबन्धः ज्ञानेन निवर्त्यते इति वेदान्तसिद्धान्तः। इति शम्॥

*दर्शनसङ्कायाध्यक्षः*
*श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्*
*गीर–सोमनाथः– 362266 (गुजरातम्)*

22. श्वेताश्वतरोपनिषत्, 3-8

23. विवरणप्रमेयसङ्ग्रहः, पृ. 22